श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ षट्चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ षट्चत्वारिंशः सर्गः ॥

## रावणस्य पञ्चसेनापतीनां वधः

हतान् मन्त्रिसुतान् बुद्ध्वा वानरेण महात्मना।
रावणः संवृताकारश्चकार मतिमुत्तमाम्॥ **5.46.1** ॥

स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसम्।
प्रघसं भासकर्णं च पञ्च सेनाग्रनायकान्॥ **5.46.2** ॥

सन्दिदेश दशग्रीवो वीरान् नयविशारदान्।
हनूमद्ग्रहणेऽव्यग्रान् वायुवेगसमान् युधि॥ **5.46.3** ॥

यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः।
सवाजिरथमातङ्गाः स कपिः शास्यतामिति॥ **5.46.4** ॥

यत्तैश्च खलु भाव्यं स्यात् तमासाद्य वनालयम्।
कर्म चापि समाधेयं देशकालाविरोधितम्॥ **5.46.5** ॥

न ह्यहं तं कपिं मन्ये कर्मणा प्रति तर्कयन्।
सर्वथा तन्महद् भूतं महाबलपरिग्रहम्॥ **5.46.6** ॥

वानरोऽयमिति ज्ञात्वा नहि शुद्ध्यति मे मनः।
नैवाहं तं कपिं मन्ये यथेयं प्रस्तुता कथा॥ **5.46.7** ॥

भवेदिन्द्रेण वा सृष्टमस्मदर्थं तपोबलात्।
सनागयक्षगन्धर्वदेवासुरमहर्षयः॥ **5.46.8** ॥

युष्माभिः प्रहितैः सर्वैर्मया सह विनिर्जिताः।
तैरवश्यं विधातव्यं व्यलीकं किञ्चिदेव नः॥ **5.46.9** ॥

तदेव नात्र सन्देहः प्रसह्य परिगृह्यताम्।
यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः॥ **5.46.10** ॥

सवाजिरथमातङ्गाः स कपिः शास्यतामिति।
नावमन्यो भवद्भिश्च कपिर्धीरपराक्रमः॥ **5.46.11** ॥

दृष्टा हि हरयः पूर्वे मया विपुलविक्रमाः।
वाली च सह सुग्रीवो जाम्बवांश्च महाबलः॥ **5.46.12** ॥

नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः।
नैव तेषां गतिर्भीमा न तेजो न पराक्रमः॥ **5.46.13** ॥

न मतिर्न बलोत्साहो न रूपपरिकल्पनम्।
महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम्॥ **5.46.14** ॥

प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः।
कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः॥ **5.46.15** ॥

भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे।
तथापि तु नयज्ञेन जयमाकाङ्क्षता रणे॥ **5.46.16** ॥

आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला।
ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः॥ **5.46.17** ॥

समुत्पेतुर्महावेगा हुताशसमतेजसः।
रथैश्च मत्तैर्नागैश्च वाजिभिश्च महाजवैः॥ **5.46.18** ॥

शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपहिता बलैः।
ततस्तु ददृशुर्वीरा दीप्यमानं महाकपिम्॥ **5.46.19** ॥

रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम्।
तोरणस्थं महावेगं महासत्त्वं महाबलम्॥ **5.46.20** ॥

महामतिं महोत्साहं महाकायं महाभुजम्।
तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः॥ **5.46.21** ॥

तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः।
तस्य पञ्चायसास्तीक्ष्णाः सिताः पीतमुखाः शराः।
शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः॥ **5.46.22** ॥

स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः।
उत्पपात नदन् व्योम्नि दिशो दश विनादयन्॥ **5.46.23** ॥

ततस्तु दुर्धरो वीरः सरथः सज्जकार्मुकः।
किरन् शरशतैर्नैकैरभिपेदे महाबलः॥ **5.46.24** ॥

स कपिर्वारयामास तं व्योम्नि शरवर्षिणम्।
वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः॥ **5.46.25** ॥

अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः।
चकार निनदं भूयो व्यवर्धत च वीर्यवान्॥ **5.46.26** ॥

स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः।
निपपात महावेगो विद्युद्राशिर्गिराविव॥ **5.46.27** ॥

ततः स मथिताष्टाश्वं रथं भग्नाक्षकूबरम्।
विहाय न्यपतद् भूमौ दुर्धरस्त्यक्तजीवितः॥ **5.46.28** ॥

तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि।
तौ जातरोषौ दुर्धर्षावुत्पेततुररिन्दमौ॥ **5.46.29** ॥

स ताभ्यां सहसोत्प्लुत्य विष्ठितो विमलेऽम्बरे।
मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः॥ **5.46.30** ॥

तयोर्वेगवतोर्वेगं निहत्य स महाबलः।
निपपात पुनर्भूमौ सुपर्ण इव वेगितः॥ **5.46.31** ॥

स सालवृक्षमासाद्य समुत्पाट्य च वानरः।
तावुभौ राक्षसौ वीरौ जघान पवनात्मजः॥ **5.46.32** ॥

ततस्तांस्त्रीन् हताञ्ज्ञात्वा वानरेण तरस्विना।
अभिपेदे महावेगः प्रहस्य प्रघसो बली॥ **5.46.33** ॥

भासकर्णश्च सङ्क्रुद्धः शूलमादाय वीर्यवान्।
एकतः कपिशार्दूलं यशस्विनमवस्थितौ॥ **5.46.34** ॥

पट्टिशेन शिताग्रेण प्रघसः प्रत्यपोथयत्।
भासकर्णश्च शूलेन राक्षसः कपिकुञ्जरम्॥ **5.46.35** ॥

स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः।
अभवद् वानरः क्रुद्धो बालसूर्यसमप्रभः॥ **5.46.36** ॥

समुत्पाट्य गिरेः शृङ्गं समृगव्यालपादपम्।
जघान हनुमान् वीरो राक्षसौ कपिकुञ्जरः।
गिरिशृङ्गसुनिष्पिष्टौ तिलशस्तौ बभूवतुः॥ **5.46.37** ॥

ततस्तेष्ववसन्नेषु सेनापतिषु पञ्चसु।
बलं तदवशेषं तु नाशयामास वानरः॥ **5.46.38** ॥

अश्वैरश्वान् गजैर्नागान् योधैर्योधान् रथै रथान्।
स कपिर्नाशयामास सहस्राक्ष इवासुरान्॥ **5.46.39** ॥

हयैर्नागैस्तुरङ्गैश्च भग्नाक्षैश्च महारथैः।
हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः॥ **5.46.40** ॥

ततः कपिस्तान् ध्वजिनीपतीन् रणे
निहत्य वीरान् सबलान् सवाहनान्।
तथैव वीरः परिगृह्य तोरणं
कृतक्षणः काल इव प्रजाक्षये॥ **5.46.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षड्चत्वारिंशः सर्गः॥